# ॥ जाबाल्युपनिषत् ॥

जाबाल्युपनिषद्वेद्यपदतत्त्वस्वरूपकम् ।
पारमैश्वर्यविभवं रामचन्द्रपदं भजे ॥
ॐ आप्यायन्तु मामाङ्गानि वाक्प्राणश्चक्षुः
श्रोत्रमथो बलमिन्द्रियाणि च ॥ सर्वाणि सर्वं
ब्रह्मोपनिषदं माहं ब्रह्म निराकुर्यां मा मा
ब्रह्म निराकरोदनिराकरणमस्त्वनिराकरणं मेस्तु
तदात्मनि निरते य उपनिषत्सु धर्मास्ते मयि सन्तु ते मयि सन्तु ॥
ॐ शान्तिः शान्तिः शान्तिः ॥
हरिः ॐ ॥ अथ हैनं भगवन्तं जाबालिं पैप्पलादिः
पप्रच्छ भगवन्मे ब्रूहि परमतत्त्वरहस्यम् । किं
तत्त्वं को जीवः कः पशुः क ईशः को मोक्षोपाय इति ।
स तं होवाच साधु पृष्टं सर्वं निवेदयामि
यथाज्ञातमिति । पुनः स तमुवाच कुतस्त्वया ज्ञातमिति ।
पुनः स तमुवाच षडाननादिति । पुनः स तमुवाच
तेनाथ कुतो ज्ञातमिति । पुनः स तमुवाच तेनेशानादिति ।
पुनः स तमुवाच कथं तस्मात्तेन ज्ञातमिति । पुनः स
तमुवाच तदुश्पासनादिति । पुनः स तमुवाच भगवन्कृपया
मे सरहस्यं सर्वं निवेदयेति । स तेन पृष्टः सर्वं
निवेदयामास तत्त्वम् । पशुपतिरहङ्काराविष्टः
संसारी जीवः स एव पशुः । सर्वज्ञः पञ्चकृत्यसंपन्नः
सर्वेश्वर ईशः पशुपतिः । के पशव इति पुनः स तमुवाच जीवाः
पशव उक्ताः । तत्पतित्वात्पशुपतिः । स पुनस्तं होवाच कथं
जीवाः पशव इति । कथं तत्पतिरिति । स तमुवाच यथा तृणाशिनो
विवेकहीनाः परप्रेष्याः कृष्यादिकर्मसु नियुक्ताः
सकलदुःखसहाः स्वस्वामिबध्यमाना गवादयः पशवः ।
यथा तत्स्वामिन इव सर्वज्ञ ईशः पशुपतिः । तज्ज्ञानं
केनोपायेन जायते । पुनः स तमुवाच विभूतिधारणादेव ।
तत्प्रकारः कथमिति । कुत्रकुत्र धार्यम् । पुनः स तमुवाच
सद्योजातादिपञ्चब्रह्ममन्त्रैर्भस्म संगृह्याग्निरिति
भस्मेत्यनेनाभिमन्त्र्य मानस्तोक इति समुद्धृत्य जलेन
संसृज्य त्र्यायुपमिति शिरोललाटवक्षःस्कन्धेष्विति
तिसृभिस्त्र्यायुपैस्त्रियम्बकैस्तिस्रो रेखाः प्रकुर्वीत ।

व्रतमेतच्छाम्भवं सर्वेषु वेदेषु वेदवादिभिरुक्तं
भवति ।तत्समाचरेन्मुमुक्षुर्न पुनर्भवाय ।अथ
सनत्कुमारः प्रमाणं पृच्छति ।त्रिपुण्ड्रधारणस्य
त्रिधः रेखा आललाटादाचक्षुषोराभ्रुवोर्मध्यतश्च ।
यास्य प्रथमा रेखा सा गार्हपत्यश्चाकारो रजो भूर्लोकः
स्वात्मा क्रियाशक्तिः ऋग्वेदः प्रातःसवनं प्रजापतिर्देवो
देवतेति ।यास्य द्वितीया रेखा सा दक्षिणाग्निरुकारः
सत्वमन्तरिक्षमन्तरात्मा चेच्छाशक्तिर्यजुर्वेदो
माध्यन्दिनसवनं विष्णुर्देवो देवतेति ।यास्य तृतीया रेखा
साहवनीयो मकारस्तमो द्यौर्लोकः परमात्मा ज्ञानशक्तिः
सामवेदस्तृतीयसवनं महादेवो देवतेति त्रिपुण्ड्रं भस्मना
करोति ।यो विद्वान्ब्रह्मचारी गृही वानप्रस्थो यतिर्वा स
महापातकोपपातकेभ्यः पूतो भवति ।स सर्वान्देवान्ध्यातो
भवति ।स सर्वेषु तीर्थेषु स्नातो भवति ।स सकलरुद्रमन्त्रजापी
भवति ।न स पुनरावर्तते न स पुनरावर्तते ॥इति ।ॐ सत्यमित्युपनिषत् ॥
ॐ आप्यायन्तु मामाङ्गानि वाक्प्राणश्चक्षुः
श्रोत्रमथो बलमिन्द्रियाणि च ॥सर्वाणि सर्वं
ब्रह्मोपनिषदं माहं ब्रह्म निराकुर्यां मा मा
ब्रह्म निराकरोदनिराकरणमस्त्वनिराकरणं मेस्तु
तदात्मनि निरते य उपनिषत्सु धर्मास्ते मयि सन्तु ते मयि सन्तु ॥
ॐ शान्तिः शान्तिः शान्तिः ॥हरिः ॐ तत्सत् ॥
इति श्रीजाबाल्युपनिषत्समाप्ता ॥

---